श्री दत्त स्तव स्तोत्रं

श्री दत्त स्तव स्तोत्रं

भूतप्रेतपिशाचाद्या यस्य स्मरणमात्रतः |
दूरादेव पलायंते दत्तात्रेयं नमामि तं ||1||

यन्नामस्मरणाद्दैन्यं पापं तापश्च नश्यति |
भीतिग्रहार्तिदुःस्वप्नं दत्तात्रेयं नमामि तं ||2||

दद्रुस्फोटककुष्ठादि महामारी विषूचिका |
नश्यंत्यन्येऽपि रोगाश्च दत्तात्रेयं नमामि तं ||3||

संगजा देशकालोत्था अपि सांक्रमिका गदाः |
शाम्यंति यत्स्मरणतो दत्तात्रेयं नमामि तं ||4||

सर्पवृश्चिकदष्टानां विषार्तानां शरीरिणां |
यन्नाम शांतिदं शीघ्रं दत्तात्रेयं नमामि तं ||5||

त्रिविधोत्पातशमनं विविधारिष्टनाशनं |
यन्नाम क्रूरभीतिघ्नं दत्तात्रेयं नमामि तं ||6||

वैर्यादिकृतमंत्रादिप्रयोगा यस्य कीर्तनात् |
नश्यंति देवबाधाश्च दत्तात्रेयं नमामि तं ||7||

यच्छिष्यस्मरणात्सद्यो गतनष्टादि लभ्यते |
य ईशः सर्वतस्त्राता दत्तात्रेयं नमामि तं ||8||

जयलाभयशःकामदातुर्दत्तस्य यः स्तवं |
भोगमोक्षप्रदस्येमं पठेद्दत्तप्रियो भवेत् ||9||

इति श्रीवासुदेवानंदसरस्वतीविरचितं दत्तस्तवस्तोत्रं संपूर्णं |